अष्टमूर्त्यष्टकं

अष्टमूर्त्यष्टकं

तुष्टावाष्टतनुं हृष्टः प्रफुल्लनयनाचलः |
मौळावंजलिमाधाय वदन् जय जयेति च || 1 ||

भार्गव उवाच |
त्वं भाभिराभिरभिभूय तमः समस्त-
-मस्तं नयस्यभिमतानि निशाचराणां |
देदीप्यसे दिवमणे गगने हिताय
लोकत्रयस्य जगदीश्वर तन्नमस्ते || 2 ||

लोकेऽतिवेलमतिवेलमहामहोभि-
-र्निर्भासि कौ च गगनेऽखिललोकनेत्र |
विद्राविताखिलतमाः सुतमो हिमांशो
पीयूषपूर परिपूरित तन्नमस्ते || 3 ||

त्वं पावने पथि सदागतिरप्युपास्यः
कस्त्वां विना भुवन जीवन जीवतीह |
स्तब्धप्रभंजनविवर्धितसर्वजंतो
संतोषिताहिकुल सर्वग वै नमस्ते || 4 ||

विश्वैकपावक न तावकपावकैक-
-शक्तेर्ऋते मृतवतामृतदिव्यकार्यं |
प्राणित्यदो जगदहो जगदंतरात्मं-
-स्त्वं पावकः प्रतिपदं शमदो नमस्ते || 5 ||

पानीयरूप परमेश जगत्पवित्र
चित्रातिचित्रसुचरित्रकरोऽसि नूनं |
विश्वं पवित्रममलं किल विश्वनाथ
पानीयगाहनत एतदतो नतोऽस्मि || 6 ||

आकाशरूप बहिरंतरुतावकाश-
-दानाद्विकस्वरमिहेश्वर विश्वमेतत् |
त्वत्तः सदा सदय संश्वसिति स्वभावा-
-त्संकोचमेति भवतोऽस्मि नतस्ततस्त्वां || 7 ||

विश्वंभरात्मक बिभर्षि विभोत्र विश्वं
को विश्वनाथ भवतोऽन्यतमस्तमोऽरिः |
स त्वं विनाशय तमो मम चाहिभूष
स्तव्यात्परः परपरं प्रणतस्ततस्त्वां || 8 ||

आत्मस्वरूप तवरूप परंपराभि-
-राभिस्ततं हर चराचररूपमेतत् |
सर्वांतरात्मनिलय प्रतिरूपरूप
नित्यं नतोऽस्मि परमात्मजनोऽष्टमूर्ते || 9 ||

इत्यष्टमूर्तिभिरिमाभिरबंधबंधो
युक्तः करोषि खलु विश्वजनीनमूर्ते |
एतत्ततं सुविततं प्रणतप्रणीत
सर्वार्थसार्थपरमार्थ ततो नतोऽस्मि || 10 ||

अष्टमूर्त्यष्टकेनेत्थं परिष्टुत्येति भार्गवः |
भर्गं भूमिमिळन्मौळिः प्रणनाम पुनः पुनः || 11 ||

इति शिवमहापुराणे रुद्रसंहितायां युद्धखंडे पंचाशत्तमोऽध्याये शुक्राचार्यकृत अष्टमूर्त्यष्टकं